**अरिगूर्त्त(र्त्त)** पु॰ अरये तद्धननाय गूर्त्तः उद्युक्तः गुरी उद्यमे क्त तस्य न वेदे नत्वम् । शत्रुबधायोद्युक्ते "पर्षद्दरि गूर्त्तः सूरिः ऋ॰१,१८६,२ लोके तु अरिगूर्ण इत्येव ।

**अरिता** स्त्री अरेर्भावः तल् । शत्रुतायामनिष्टसम्पादने ।

**अरित्र** पु॰ ऋ—अन्तर्भूतण्यर्थे इत्र् वेदे इट् । नाविके कर्णधारे "इयर्त्ति वाचमरितेव नावम्" ऋ॰६,६५,२, २,४२,१, लोके तु नेट् अर्त्ता गन्तरि स्त्रियां ङीप् ।

**अरित्र** न॰ ऋच्छत्यनेन ऋ—इत्र । (हालि( इति ख्याते १नौकाचालनकाष्ठे । "लोलैररित्रैश्चरणैरिवाभितः" माघः "नौर्ह वा एषा स्वर्ग्या यद्बहिष्पवमानं तस्या ऋत्विज एव स्फ्याश्चारित्राश्च" शत॰ब्रा॰। २गमनसाधने वाहनादौ च "अरित्रं वां दिवस्पृथु" ऋ॰१,४६,८, 'अरित्रं गमनसाधनं नौरूपम्" भा॰ । "शतारित्रां नावमातस्थिवांसम्" ऋ॰१,११६।५, 'शतारित्रां बह्वरित्रां यैः काष्ठैः पार्श्वतोबद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि" भा॰। अरितः पापादितस्त्रायते त्रै-क । पापादितो २रक्षके त्रि॰ । "दशारित्रो मनुष्यः स्वर्षाः" ऋ॰२,१८,१, "दशारित्रः अरिभ्य पापेभ्यस्त्रायन्ते इत्यरित्रा ग्रहाः दशसंख्याकाग्रहायस्य" भा॰ । काश्या॰ ठञ्ञिठौ । तत्सम्बन्धिनि आरत्रिकः तद्वादौ च त्रि॰ ञिठ स्त्रियां ङीष् ।

**अरिदान्त** पु॰ अरिर्दान्तोयेन निष्ठान्तत्वात् विशेष्यस्यापि परनिपातः । यदुवंश्ये क्षत्रियभेदे । 'रामे भारं समासज्य, युयुधाने च वीर्य्यवान् । अक्रूरे विपृथौ चापि गदे च कृतवर्म्मणि । चक्रदेवे सुदेवे च सारणे च महाबले । निवृत्तशत्रौ विक्रान्ते भङ्गकारे विदूरथे । उग्रसेनात्मजे कङ्के शतद्युम्ने च केशवः । राजाधिदेवे मृदरे प्रसेने चित्रके तथा । अरिदान्ते बृहद्दुर्गे श्वफल्के सात्यकौ पृथौ । वृष्ण्यन्धकेषु चान्येषु मुख्येषु । मधुसूदनः । गुरुमासज्य तं भारं ययौ द्वारवतीं प्रति" । इति हरिवं॰।

**अरिधायस्** त्रि॰ अरिभिरीश्वरैः धार्य्यते धा—असुन् पृ॰ युट् च । ईश्वरधार्य्ये । "अष्टावरिधायसोगाः" ऋ॰ १,१२६, ५, अरिधायसः "अरिभिरीश्वरैः धार्य्यमाणा" भा॰ ।

**अरिनन्दन** त्रि॰ अरीन् शत्रून् नन्दयति तोषयति नन्द-णिच्—ल्यु उप॰स॰। शत्रुसन्तोषके अकृतेन्द्रियजये व्यसनासक्ते ।

**अरिन्दम** त्रि॰ अरीन् शत्रून् कामादीन्वा दाम्यति दमयति दम—अन्तर्भूतण्यर्थे खच् मुम् उप॰स॰ । पराभिभावके १शत्रुतापके २जितकामादौ च। काश्या॰ ठञ्ञिठौ आरिन्दमिकः। तत्सम्बन्धिनि त्रि॰ ञिठि स्त्रियां ङीष् ।

**अरिप्र** त्रि॰ रिप्रमिति निरुक्ते पापनाम तन्नास्ति यस्य। पापरहिते "अरिप्रा वृत्रहन्तमाः" ऋ॰८,८,६, "रिप्रमिति पापनाम" भा॰ । "तं वो वयं शुचिमरिप्रमद्य" । ऋ॰७,४७,१, "अरिप्रं पापरहितम्" भा॰ ।

**अरिमर्द्द** पु॰ अरिं रोगरूपं शत्रुं मृद्नाति मृद—अण् उ॰स॰ १कासमर्द्दवृक्षे । २शत्रुतापके त्रि॰ ।

**अरिमर्द्दन** त्रि॰ अरिं मृद्नाति मृद—ल्यु—उप॰स॰ । १शत्रुतापके गान्दिनीपुत्रे अक्रूरसोदरे श्वफल्कस्य पुत्रे यदुवंश्ये क्षत्रियभेदे "श्वफल्कः काशिराजस्य सुतां भार्य्यामविन्दत । गान्दिनीं नाम तस्यार्थे गाः सदा प्रददौ पिता । तस्यां जज्ञे महाबाहुः श्रुतवानिति विश्रुतः । अक्रूरोऽथ महाभागो यज्वा विपुलदक्षिणः । उपमद्गुस्तथा मद्गुर्मुदरश्चारिमर्द्दनः । अरिक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः । धर्म्मभृद्यतिधर्म्मा च गृध्रमोजान्तकस्तथा आवाहाप्रतिवाहौ च सुन्दरी च वराङ्गना" हरिवं॰।

**अरिमेजय** पु॰ अरिमेजयति कम्पयति एज—णिच्—खश् मुम् उ॰स॰। शत्रुतापके अक्रूरसोदरे यदुवंश्ये क्षत्रियभेदे अरिमर्द्दनशब्दे विवृतिः ।

**अरिमेद** पु॰ अरेर्विट्खदिरस्येव मेदः सारः स्यन्दोऽस्य । (गुइयाबावला) १वृक्षभेदे । अरिरिव मेद्यति कृच्छ्रत्वात् अल्पं स्निह्यति मिद—अच् । २विट्खदिरे । संज्ञायां कन् । ३कृमिभेदे तद्गणनायाम् "वाहृका पिप्पिटः कुम्भी वर्च्चकीटोऽरिमेदकः" सुश्रु॰ ।

**अरिला** स्त्री 'षोड़शकले विलासिनि ! छन्दसि प्रतिपदमन्ते यमकविलासिनि । अरिला नाम पयोधरधारिणि ! शेषे नियतलघुद्वयधारिणि" "इत्युक्तलक्षणे मात्रावृत्तभेदे ।

**अरिष** पु॰ न इयर्त्ति मलं यस्मात् ऋ-किषन् न॰ त॰ । १अपानमांसजे रोगभेदे । न रिष्यति विच्छिद्यते रिष-क न॰त॰ । २अविच्छिन्नधारावर्षणे न॰ ।

**अरिषड़ष्टक** न॰षट् च अष्टौ च द्व॰ ततः परिमाणार्थे कन् षड़ष्टकम् अरिस्वामिकं षड़ष्टकं शाक॰ त॰ । विवाहे वर्जनीये योगविशेषे, तथाहि दम्पत्योः परस्पर राश्यपेक्षया परस्परस्य राशेः षष्ठत्वेऽष्टमत्वे वा अशुभं तयोः राश्योर्मित्रस्वामिकत्वे पुनर्न दोषः शत्रुस्वामिकत्वेऽतीव दोषः । यथोक्तं 'मकरः कर्कटकुलीरपुणा कन्या मेषेण सह झषस्तुलया । कर्किघटौ वृषधनुषी